In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

All India Oriental Conference

Twentysixth Session.

VIKRAM UNIVERSITY, UJJAIN

26-28 October, 1972

अखिल भारतीय प्राच्यविद्यासम्मेलनम्

PRESIDENT'S ADDRESS

अध्यक्षीयाभिभाषणम्

डॉ. नेमिचन्द्र शास्त्री, एम्. ए. (त्रय), पी-एच. डी., डी. लिट्.

अध्यक्षः, संस्कृत-प्राकृतविभाग, एच. डी. जैन कॉलेज, आरा.

मगधविश्वविद्यालय, बोधगया

Prakrit & Jainism - Section

प्राकृत - जैनविद्याविभागः

Published by

Shree Veer Sewamandir Trust, Sarsawa.

Office, Chamelee Kuteer

1/128 Dumaron Bagh Colony, Assi, Varanasi.

श्री वीरसेवामन्दिर, ट्रस्ट, सरसावा,

कार्यालय, चमेली कुटीर, १/१२८, डुमराँव बाग-बस्ति, अस्सी, वाराणसी.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

उपस्थिताः विपश्चितो गुरुजनाश्च !

सर्वप्रथममहं भवतां समेषां विदुषामाभारस्वीकरणं स्वकर्त्तव्यं मन्ये। यतो भवद्भिरहं पदेऽस्मिन्नासीनः कृतः। प्रसङ्गेऽस्मिन् यदाहं स्वीयां योग्यतां विचारयामि तदैतत्प्रतीयते यद्भवद्भिर्मादृशाय जनाय प्रदत्तेऽस्मिन्नवसरे नात्र मम वैदुष्यं कारणं प्रत्युत जैनशास्त्रस्य प्राकृतभाषायाश्च क्षेत्रेऽध्येतॄणामभाव एवास्ति। येऽस्मिन् क्षेत्रेऽधिकारिणो विद्वांसो विद्यन्ते, तैः पुनः पुनरेतत्पदोपलब्धौ नौचित्यं ज्ञातमिति संभावयामि। वस्तुतोऽस्मिन् पदे भवन्नियोजितेन मया साफल्यं लभ्यते चेत्तत्र भवतामेव संभावनागुण इति निश्चितम् :—

सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः
संभावनागुणमवेहि तमीश्वराणाम्।
किं वाऽभविष्यदरुणस्तमसां विभेत्ता,
तं चेत् सहस्रकिरणो धुरि नाऽकरिष्यत्।

अस्त्वहमिदानीं विषयारम्भात् पूर्वमेतद्विषयस्य विदुषोः —पूज्यस्वर्गीय-मुनिपुण्यविजयमहाराजाचार्य - जुगलकिशोरमुख्तारमहोदययोः पुण्यस्मरणं करोमि तथा ताभ्यां श्रद्धां भक्तिञ्च समर्पयामि। दिवंगतयोरेतयोः रिक्तस्थानपूर्त्तिर्न कदापि संभवा विद्यते। मुनिपुण्यविजयमहोदयः प्राकृतभाषासाहित्येतिहासयोरद्वितीयो विद्वानासीत्। तेन विदुषाऽगमसाहित्य 'वसुदेवहिण्डी' सदृशानेकमहत्त्वपूर्णग्रन्थाः सम्पादिताः प्रकाशिताश्च। आचार्य-जुगलकिशोरमुख्तारमहोदयेन च योगसारतत्त्वानुशासनाप्तमीमांसा-बृहत्स्वयंभूस्तोत्रसदृशानेकग्रन्थानां सम्पादनेन सह पुरातनजैनवाक्यसूचीसदृशविविधकृतीनां प्रणयनमकारि। एतयोः विदुषोः पुण्यस्मरणानन्तरमहं जैनाध्ययनरय प्रगतिदिशि भवतां ध्यानावर्जनं चिकीर्षामि।

विश्वविद्यालयीयस्तरे प्राकृताध्ययनम्

प्रायोऽद्य भारतीयेषु समस्तविश्वविद्यालयेषु जैनवाङ्मयस्य जैनदर्शनस्य च लघीयसा रूपेणाध्ययनं जायमानं वर्त्तते, परं प्राकृतभाषायाः जैनशास्त्रस्य च स्नातकोत्तरकक्षासु यादृशमध्ययनमपेक्ष्यते तादृशस्य व्यवस्था नाद्यावधिर्जाता। गुजरातविश्वविद्यालयेऽहमदावादनगरे प्राकृतभाषायाः अध्ययनाऽध्यापने प्रारब्धेस्तः। मैसूर-विश्वविद्यालये साहू शान्तिप्रसादजैनस्य पञ्चलक्षात्मकमुद्राणांदानेन प्राकृतस्य जैनशास्त्रस्य च विभागस्थापना स्वतन्त्ररूपेण कृता विद्यते। एतद्विभागीया आचार्या अध्यक्षाः प्राकृतजैनशास्त्रयोर्मूर्धन्यविद्वांसो डा० ए०

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

एन्० उपाध्ये-महोदयाः सन्ति। वयं विश्वस्ताः स्मो यत्तेषामध्यक्षतायामेष विभाग उत्तरोत्तरं विकसितो भविष्यति।

बम्बई-विश्वविद्यालये कोल्हापुरीय - शिवाजीविश्वविद्यालये चार्द्धमागधी-विभागो विगतवर्षेभ्यश्चलन्नायाति। तत्र च स्नातकोत्तरकक्षाणामध्यापनं शोधकार्यञ्च भवतः।

नवीनेषु स्थापितेषु विश्वविद्यालयेषु प्राकृताध्ययनदृष्ट्या जबलपुर–विश्व-विद्यालयस्य स्थानं प्रथममस्ति। प्राकृत-जैनसाहित्ययोर्वरिष्ठविदुषो डा० हीरा-लालजैनस्य प्रयत्नेन जबलपुर-विश्वविद्यालये स्नातकोत्तरकक्षासु प्राकृताध्ययनस्य प्रारम्भोऽजनि। तत्रानेकशोधार्थिनः प्राकृतसाहित्यस्य विविधाङ्गेषु शोधकार्यं कुर्वन्तः सन्ति।

मगधविश्वविद्यालये स्नातककक्षापर्यन्ताध्ययनं विगतानेकवर्षेभ्यश्चल-दस्ति। किन्त्वस्माद्वर्षात् प्राकृते स्नातकोत्तरकक्षा अपि प्रारब्धाः। एतत्कृते सम्पूर्णश्रेयोभाजो मगधविश्वविद्यालयस्याधिकारिणः सन्ति, यैः मगधसंस्कृतेः प्राणभूतप्राकृतवाङ्मयस्याध्ययनदिशि प्रयासो विहितः।

वर्षेऽस्मिन्नेव आरानगरस्थिताय श्रीदेवकुमारजैन–प्राच्यशोधसंस्थानायापि विश्वविद्यालयेन मान्यता प्रदत्ता तथेदानीं तत्राष्टौ शोधार्थिनः शोधसंस्थानेऽस्मिन् जैनविद्यासम्बद्धेषु विषयेषु शोधकार्यं कुर्वाणाः विद्यन्ते। शोधसंस्थानमिदं विश्वविद्यालयेन सह संबद्धुं वर्षेभ्यः प्रयासं कुर्वदासीत् परं सम्प्रति परमो-दारेण कुलपतिमहोदयेनास्मै विधिवत् सम्बद्धता प्रदत्ता।

अन्यशोधसंस्थानेषु श्रीदलपतिभाई - लालभाई-भारतीय-संस्कृति-शोध-मन्दिरमहमदाबादीयम्, श्रीपार्श्वनाथविद्याश्रमो वाराणसेयस्तथा वैशालीशोध-संस्थानं प्रमुखाणि सन्ति। एषु त्रिषु शोधसंस्थानेषु शोधकार्येण स्नातकोत्तरा-ध्ययनेन च सह ग्रन्थप्रकाशनमपि जायते। अस्मिन्नेव १९७१ तमे ख्रीष्टाब्दे वाराणस्यां वर्णिशोधसंस्थानस्य शिलान्यासो जैननिकेतनेऽभवत्। एतस्य भवनञ्च पूर्णं जातम्। वर्णिग्रन्थागारस्यापि स्थापना जाता। एवं प्रकारेण वाराणस्यां पार्श्वनाथशोधसंस्थानेन सह श्रीगणेशप्रसादवर्णि-शोधसंस्थानमपि जैनशास्त्रविषयके शोधकार्ये ग्रन्थप्रकाशनादिकार्ये च प्रवृत्तं भविष्यति।

दिल्लीनगरे मुनिश्रीसुशीलकुमारस्य प्रयत्नेनासिंहाभवने प्राच्यपद्धत्याधारे प्राकृतवाङ्मयस्य जैनवाङ्मयस्य चाध्ययनाध्यापने प्रारब्धे जाते। तत्रत्ये वीरसेवामन्दिरमहिंसामन्दिरञ्चापि प्रकाशनक्षेत्रे गतिशीले स्तः। अहिंसा-मन्दिरात् समयसारस्याध्यात्मख्यातिटीकायाः मातृभाषानुवादः कतिपयपौरा-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

णिकरचनाश्च प्रकाशिताः सन्ति। महावीरशोधसंस्थानात् जयपुरनगरस्थादपि ग्रन्थसूचीप्रकाशनं जातम्; येनानेकाप्रकाशितग्रन्थानां परिज्ञानं जायते। लाडनू नगरे, राजस्थाने, जैनविश्वभारत्याः स्थापनाऽचिरादेव जातास्ति, यया संस्थया शोधरतच्छात्रेभ्यश्चतुर्भ्यः प्रतिवर्षं चतस्रश्छात्रवृत्तयो दास्यन्ते। एका शोध-पत्रिकापि प्राकृतापभ्रंशभाषासाहित्यालोचिकाऽस्याः संस्थायाः प्रकाशिता भविष्यति।

प्रकाशनप्रतिष्ठानानि

प्राकृतजैनशास्त्रस्य जैन-दर्शन-विषयकग्रन्थानाञ्च प्रकाशनस्याधुनिकपद्धत्या सम्पादनं याकोबी-सदृशविद्वद्भिर्विहितम्। सम्प्रति भारतीयज्ञानपीठस्य तत्त्वावधाने मूर्त्तिदेवी—जैनग्रन्थमाला, माणिकचन्द्रदिगम्बरजैनग्रन्थमाला, सिंघी जैनग्रन्थमाला, जैनसाहित्योद्धारकनिधि-जैनग्रन्थमाला, आत्मानन्द-जैनग्रन्थमाला, जीवराजजैनग्रन्थमाला, वर्णिग्रन्थमाला, दिगम्बरजैनसंघः-वीरसेवामन्दिर-ट्रस्टः, प्राकृतग्रन्थसमितिः, लालभाई-दलपतभाई-ग्रन्थमाला, पार्श्वनाथविद्याश्रमः, अखिलभारतीयश्वेताम्बर-जैनकान्फ्रेंन्सः, वीरसेवामंदिरम्, महावीरभवनम्, प्रभृत्यनेकप्रकाशनसंस्थानानि प्राकृतवाङ्मयस्य जैनसाहित्यस्य च प्रकाशने तत्पराणि सन्ति। एतेभ्यः सर्वेभ्यः संस्थानेभ्यः कतिपय-शतकपर्यन्तग्रन्थेषु प्रकाश्यमानेष्वपि साम्प्रतमप्रकाशितसाहित्यमपि विपुलं स्थास्यति। अतो योजनाबद्धरूपेण यावद् ग्रन्थानां प्रकाशनं न संपत्स्यते, तावत् प्रकाशितग्रन्थानां प्रकाशनं न शक्यं विद्यते। संस्कृत-प्राकृतापभ्रंश-प्रभृति-भारतीयभाषास्वप्रकाशितग्रन्थानां कतिपयशतकानि सन्ति। एतेषां ग्रन्थानां प्रकाशनेन संस्कृति-साहित्ययोरनेकसमस्यानां समाधानं सुतरां सम्भत्स्यते।

१९७०-७२ शून्यर्षिनवैक-द्विमुनिनवैकखीष्टाब्दयोः प्रगतिः

शून्यर्षिनवैक-द्विमुनिनवैक (१९७०-७२) खीष्टाब्दयोः प्राकृतजैनविषयेषु कतिपये शोधप्रबन्धाः विश्वविद्यालयेषु 'पी०एच०डी०'—उपाधिकृते प्रस्तुताः। शोधार्थिभिरुपाधयो लब्धाश्च। पार्श्वनाथविद्याश्रमस्य तत्त्वावधाने कतिपयैः शोधार्थिभिरुत्तराध्ययनाचाराङ्गादिग्रन्थेषु शोधकार्याणि विहितानि। तत एव च 'उत्तराध्ययनसूत्र-परिशीलनम्' तथा 'जैनफिलासफी' - नामकग्रन्थयोः प्रकाशनमभूत्। वैशालीशोधसंस्थाने कर्पूरमञ्जर्यां समाहिते प्रेम-सौन्दर्य-तत्त्वे तथा जैनसम्बद्ध-विषयेषु पुराणाचारदर्शनग्रन्थेषु शोधकार्याणि सम्पन्नानि। जबलपुर-विश्वविद्यालये जैनसृष्टिविद्यायामेको महत्त्वपूर्णशोधप्रबन्धः प्रस्तुतो विद्यते। मगधविश्वविद्यालये संस्कृतनाटकेषु जैननाटककाराणां योगदानम्, महा-कविहस्तिमल्लः, रविषेणकृतसंस्कृतपद्मचरितस्य काव्यदर्शनभावना च, प्राकृता-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

भिलेखानां वैज्ञानिकपद्धत्याध्ययनम् , प्रभृतयः शोधप्रबन्धाः प्रस्तुताः जाताः। एतेषु शोधप्रबन्धेषु च शोधार्थिभिः पी.एच.डी. उपाधयोऽधिगताः। वाराणसेय-हिन्दूविश्वविद्यालये जैनतर्कशास्त्रेऽनुमानविचारविषयोपरि महत्त्वपूर्णशोध-प्रबन्धः प्रस्तुतो विद्यते। शोधप्रबन्धायऽस्मा अपि पी.एच.डी. उपाधिरधिगतः। एवं प्रकारेण जैनविषयेषु प्राकृतविषयेषु च विभिन्नविश्वविद्यालयेषु शोधकार्याणि सम्पन्नानि।

सम्पादन-प्रकाशने

१९६९ ग्रहशास्त्ररसैकखीष्टाब्दात् पश्चात् प्राकृतजैनशास्त्रयोः मूर्धन्य-विदुषा डॉ० ए० एन० उपाध्ये महोदयेन कुवलयमालायाः प्रस्तावना (Intro-duction) टिप्पणीसहिता प्रकाशिता। ग्रन्थेऽस्मिन् महत्त्वपूर्णे डॉ० ए० एन० उपाध्येमहोदयेन कुवलयमालायाः समालोचनात्मकमध्ययनं समुपस्थापितम्। प्रारम्भे कुवलयमालायाः हस्तलिखितपाण्डुलिपीनां विशेषतासु च विचारो विहितः। तदनन्तरं कुवलयमालायाः वर्ण्यविषयस्य सविस्तारः परिचयो दत्तो विद्यते। यावन्त्याख्यानानि घटनाश्च कुवलयमालायामङ्किताः सन्ति तेषां तासाञ्च तत्र विश्लेषणं कृतमस्ति। अनन्तरं कुवलयमालायां निहितानां जैन-सिद्धान्तानां परिचयः प्रस्तुतोऽस्ति। एतद्ग्रन्थस्य सर्वाधिकं महत्त्वपूर्णं प्रकरणं तत्कालीनसमाजसंस्कृत्योरध्ययनं वर्त्तते। प्रकरणेऽस्मिन्नष्टम-नवमशतकयोः सामाजिक-सांस्कृतिक-मूल्यानां विद्वत्तापूर्वकं तुलनात्मकमध्ययनमस्ति। रचयितु-रुद्योतनसूरेः तथा रत्नप्रभस्य संस्कृतकुवलयमालायाश्च परिचयाः प्रदत्ताः सन्ति। डॉ० उपाध्येमहोदयोऽनेकनवीनतथ्यानां प्रथमवारमुद्घाटनं कृतवान्। ग्रन्थान्ते डॉ० वासुदेवशरण–अग्रवालमहोदयेन विहितं कुवलयमालायाः सांस्कृतिकमध्य-यनमपि संलग्नं विद्यते। अध्ययनेऽस्मिन् डॉ० अग्रवालोऽपि विविधमौलिक-विषयेषु चिन्तनं कृतवान्। टिप्पणीषु ग्रन्थस्य रहस्योद्घाटनेन सह प्राकृत-सम्बन्धिनीषु विशेषतासु प्रकाशो दत्तो विद्यते। कुवलयमालाया अध्ययनमिदं शोधार्थिभ्यो मार्गदर्शकमस्ति।

डॉ० उपाध्येमहोदयः 'सप्तशतीसार' नामक - प्राकृतग्रन्थस्य वेमभूपाल-कृतभावदीपिकया संस्कृतटीकया सहितस्य सम्पादनं कृतवान्। ग्रन्थेऽस्मिन् महाकवि-हालस्य गाथासप्तशत्याः सारः शतगाथासु निबद्धो वर्त्तते। एतस्याः महत्त्वपूर्णायामाङ्गलप्रस्तावनायां मुक्तककाव्यस्य स्वरूपं विकासः तत्र च गाथा-सप्तशत्याः स्थानानि निर्धारितानि। एषा बहुमूल्यरचना कोल्हापुरीय-शिवाजी-विश्वविद्यालयस्य संस्कृतग्रन्थमालायां प्रकाशिता विद्यते।

डॉ० उपाध्येमहोदयस्यैकापरा तृतीया कृतिः सिद्धसेनदिवाकरग्रन्थसमुच्च-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

योऽस्ति (The work of Siddhsen Diwakar) अस्मिन् सिद्धर्षिकृताय : संस्कृतटीकाया आधारे न्यायावतारस्य पाठशोधनं कृतमस्ति। विद्याभूषणस्याङ्गलानुवादोऽपि सहानेन संकलितो विद्यते। परिशिष्टे न्यायकरण्डिकाङ्गलानुवादसहितापि दत्तास्ति। एतस्य ग्रन्थस्य महत्त्वपूर्णोऽशो विद्यते सिद्धसेनसम्बन्धे लि खतसाहित्यस्य सर्वेक्षणम्। ग्रन्थस्यास्य प्रस्तावनायां डॉ० उपाध्येमहोदयेन सिद्धसेनदिवाकरो यापनीयसंघस्याचार्यः प्रमाणीकृतस्तथा स हि दक्षिणनिवासी च कथितः। अतएव सिद्धसेनसम्बन्धिसाहित्याध्ययनायैतस्य महत्त्वं स्पष्टमस्ति। एतत्प्रकाशनं जैनसाहित्यमंडल-बबई-द्वारा जातम्।

प्राकृतसाहित्यस्यश्रीवृद्धये वैशाली-शोधसंस्थानस्य योगदानम्

प्राकृतवाङ्मयशोधकार्यातिरिक्तमेतस्य शोधसंस्थानस्यैकं महत्त्वपूर्णं कार्यमस्ति डॉ० हीरालालजैन-महोदयेन सम्पादितस्य 'सुदंसणचरिउ' ग्रन्थस्य प्रकाशनम्। संस्थानादस्मादन्यान्यपि बहुमूल्यानि कृतित्वानि प्रकाशमायातानि, येषु डॉ० राजारामजैन-लिखितंरइधूसाहित्यस्य समीक्षात्मकमध्ययनम् डॉ० आर० के० चन्द्र–लिखितं पउमचर्य्यस्य समीक्षात्मकमध्ययनञ्च प्राधान्यमावहतः। डॉ० हीरालालजैनोऽपभ्रंशसाहित्यस्य विलक्षणां वेदुषीमलङ्करोति। एष महाशय आलोचनाक्षेत्रे सम्पादनविधौ च परमं यशोऽर्जितवानिति नैतत्तिरोहितं विदुषाम्। निश्चयतः प्राकृतजैनाध्ययनक्षेत्रे डॉ० हीरालालजैनस्तथा डॉ० ए० एन० उपाध्ये, द्वावपि विपश्चितावपूर्वविभूती स्तः। एतयोर्लेखनी यस्यां दिशि क्षेत्रे वा यस्मिन् गतिशीला भवति सैव दिक् तत्क्षेत्रं च तन्महनीयतां भजेते। जर्मनविदुषा जैकोफ डेलू महोदयेन सम्पादितस्य भूमिकासहितस्य "वियाह पण्णति' ग्रन्थस्य ब्रजवेलजे द्वारा प्रकाशनमभूत्। पृष्ठसंख्यास्य ३५८ वर्त्तते। आलोचनात्मकटिप्पणयोऽत्र महत्त्वपूर्णाः सन्ति।

प्राकृतजैनसाहित्यस्याध्ययनक्षेत्रे भारतीयज्ञानपीठस्य कर्तृत्वम्

१९४४ खीष्टाब्दादद्यावधि संस्थेयं प्राकृतसाहित्यस्य महनीयग्रन्थान् प्रकाशयन्त्यायाति। १९६९–७२ वर्षेष्वनेकग्रन्थानां संशोधनं सम्पादनञ्च विधायानयासंस्थया प्रकाशनं विहितम्। अस्मास्तत्त्वावधाने शाकटायनव्याकरणस्य प्रथमवारमालोचनात्मकं संस्करणं प्रस्तुतमस्ति। अस्य ग्रन्थस्यापि सम्पादनं पण्डितश्रीशम्भुनाथत्रिपाठिना व्याकरणाचार्येण सप्ततीर्थेन च कृतम्। अस्य महत्त्वपूर्णाङ्गलप्रस्तावना शतपृष्ठात्मिका प्रो० डॉ० आर० विश्वे जर्मनेन लिखिता। प्रस्तावनायामस्यां पारिभाषिकशब्दावल्या, पारिभाषिकसूत्राणाञ्च विवेचनेन सह पाणिनि-कात्यायन-पतञ्जलीनां त्रयाणामाचार्याणामालोके शाकटायनव्या-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

करणस्य मूल्यनिर्धारणं कृतमस्ति। ग्रन्थपरिशिष्टे स्त्रीमुक्तिप्रकरणमपि प्रदत्तमस्ति। शाकटायनव्याकरणस्य सूत्रैः सहामोघवृत्तिरपि निबद्धा विद्यते। अस्य ग्रंथस्य प्रकाशनं भारतीयज्ञानपीठान्तर्गतमूर्तिदेवीग्रन्थमालातत्त्वावधाने जातमस्ति। व्याकरणशास्त्रदृष्ट्या त्वेतस्य ग्रन्थस्य महत्त्वमस्त्येव परं शोधार्थिभ्य एतस्य प्रस्तावनादर्शभूतास्ति। भारतीयज्ञानपीठस्यैकमपरं महत्त्वपूर्णं प्रकाशनं-जैनेन्द्रसिद्धान्तकोशोऽस्ति। क्षुल्लकजिनेन्द्रवर्णी अध्ययनशीलश्चिन्तनशीलश्च मनीषी वर्तते। तेनास्मिन् कोषे शब्दानां सङ्कलनमकरादिक्रमेण कुर्वता मूलशब्दानां प्रसङ्गे तत्सम्बद्धविभिन्नविषयाणां विवेचनं कृतम्। ऐतिहासिकक्रमेण मूलग्रंथानां सन्दर्भसंकेतं प्रदाय विषयाः एवंरूपेण प्रस्तुताः सन्ति, यत् विभिन्नग्रन्थेषूपलब्धा तद्विषयस्य सम्पूर्णा सामग्री एकत्रोपलब्धा भवेत्। कोषस्यास्येदानीमेकमेव खण्डं प्रकाशितं विद्यते, यस्मिन्नादेरारभ्यौकारपर्यन्तं जैनशब्दानां विवेचनात्मकं संकलनमस्ति। शोधार्थिभिः सह स्वाध्यायप्रणयिभ्यः एषग्रंथः परमोपयोगी वर्त्तते। श्रूयते-द्वितीयखण्डमप्यस्य प्रकाशमुपगतम्।

द्विसन्धानमहाकाव्यं प्रथमवारं हिन्द्यनुवादसहितं प्रस्तुतमस्ति। अस्य सम्पादनानुवादौ प्रो० खुशालचन्द्रगोरावाला एम. ए. साहित्याचार्येण कृतौ। अस्य सम्पादकीयलेखः डॉ० श्री तारालालजैन महोदयेन डॉ० श्री ए. एन. उपाध्ये महोदयेन च लिखितः। सम्पादकीये वृत्ते ग्रन्थकारधनञ्जयस्य ग्रन्थस्य च सम्बन्धे विस्तारपूर्वकः प्रकाशो दत्तो विद्यते। धनञ्जयस्य समयनिर्धारणे डॉ० के. पी. पाठक-मैक्समूलर-आर-जी. भण्डारक—राघवाचारियर-वैंकटसुब्बैयामहोदयानां मतानां समीक्षा विहिता विद्यते। एष ग्रन्थोऽपि भारतीयज्ञानपीठात् प्रकाशितो विद्यते।

धर्मशर्माभ्युदयनामकमहाकाव्यस्य सम्पादनानुवादौ पण्डितपन्नालालजैन साहित्याचार्यः कृतवान्। एष महाशयोऽस्य संस्कृत-मातृभाषयोरुभयोरपि टीके लिखितवान्। अनयोः टीकयोः ग्रन्थभावः पूर्णरूपेण स्पष्टीकृतो विद्यते। महाकाव्यस्यैतत्संस्करणं नवपाण्डुलिपीराधृत्य कृतं विद्यते। प्रारम्भे महत्त्वपूर्णा, नातिसंक्षिप्ता प्रस्तावनापि वर्तते, यस्यां धर्मशर्माभ्युदयस्य प्रमुखविशेषताभिः सह ग्रंथकर्तुः सम्बन्धे पर्याप्ता विचारणा विहिता विद्यते। एतस्यापि ग्रथस्य प्रकाशक भारतीयज्ञानपीठमेवास्ति।

"भविसयत्त कहा तथा अपभ्रंशकथाकाव्य"—शीर्षकशोधप्रबन्धस्य प्रकाशनं ज्ञानपीठस्य लोकोदयग्रन्थमालया कृतम्। एतस्य शोधप्रबन्धस्य लेखकः परिश्रमी तथाध्ययनशीलो युवकोऽस्ति डॉ. देवेन्द्रकुमार शास्त्री। डॉ. देवेन्द्रकुमार

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शास्त्रिणा एष शोधप्रबन्धः सप्ताध्यायेषु विभक्तो विद्यते। प्रथमाध्यायेऽपभ्रंशभाषापरम्परायाः तद्युगस्य च विवेचनमस्ति। द्वितीयाध्यायेऽपभ्रंशसाहित्यस्य संक्षिप्तं विवेचनं विद्यते, साहित्यिकप्रवृत्तीनाञ्च परिचयो दत्तोऽस्ति। तृतीयाध्याये 'भविसयत्त कहा' काव्यस्य विषयवस्तुनो विश्लेषणात्मकः परिचयो दत्तोऽस्ति। चतुर्थाध्याये—"विलासवै कहा, जिणयत्तकहा, जिनदत्तचौपाई, सीरिपाल कहा, सिद्धचक्ककहा, सत्तवितणकहा, सुदंसणचरिउ, पउमसीरिचरिउ" प्रभृतीनां परिचयाः प्रस्तुताः सन्ति। पञ्चमाध्यायेऽपभ्रंशकथाकाव्यस्य सामान्यप्रवृत्तीनां, षष्ठे लोकतत्त्वस्य, सप्तमे परम्परायाः प्रभावस्य च विवेचनानि सन्ति। अतोऽतिरिक्तकथानकरूढयोऽपि विवेचिताः विद्यन्ते।

स्वयम्भूकृतस्य 'पउमचरिउ' ग्रन्थस्य चतुर्थपञ्चमखण्डयोः मातृभाषानुवादोऽपि डा०—देवेन्द्रकुमार जैन, एम. ए. पीएच्०डी० महोदयेन कृतोऽस्ति। एतत्प्रकाशनमपि विद्यापीठेनैव विहितम्।

वाराणसेयस्य भारतीयज्ञानपीठस्यैकमपरं महत्त्वपूर्णं प्रकाशनं हरिभद्रसूरिकृतः षड्दर्शनसमुच्चयो विद्यते। ग्रन्थेऽस्मिन् मूलेन सह गुणरत्नसूरिकृता तर्क-रहस्यदीपिका, सोमतिलकसूरिकृता लघुवृत्तिकथा तथाऽज्ञातकर्तृकावचूर्णिरपि निबद्धाः सन्ति। एतस्य सम्पादनं स्वर्गीयेण डा० पण्डित महेन्द्रकुमार जैनेन न्यायाचार्येण कृतम्। प्रस्तावनास्य जैनदर्शनस्य मर्मज्ञविदुषा पं० दलसुखमालवणिया महोदयेन अहमदाबादीयेन लिखिता। ग्रन्थेऽस्मिन् बौद्ध-नैयायिक-सांख्य-जैन-वैशेषिक-जैमिनीनां षड्दर्शनानां संकलनमस्ति। इमानि दर्शनानि वैदिकावैदिकयोः द्वयोः वर्गयोः विभक्तानि सन्ति। न्यायाचार्येण पण्डितमहेन्द्रकुमारजी महोदयेन मातृभाषानुवादेन विवेचनेन च सह सहस्राधिकग्रन्थानां तुलनात्मिकाः टिप्पणयोऽपि प्रदत्ताः। प्रस्तावनायां मालवणिया-महोदयेन ग्रंथ-ग्रंथकार-टीकाकारसम्बन्धे पूर्णः प्रकाशो दत्तः। एतन्महत्त्वपूर्ण-ग्रन्थप्रकाशनाय भारतीयज्ञानपीठं धन्यवादार्हमस्ति।

भारतीयज्ञानपीठस्य कन्नडशाखया देवप्पाकवेः 'रामविजय' नामककाव्यस्य प्रकाशनं कृतम्। ग्रन्थेऽस्मिन् रामकथायाः महनीयशैल्यां काव्यात्मकं प्रणयनमभूत्। कविर्देवप्पा स्वाभाविकः कविरस्ति। तथा तेन पम्परन्नयोरनुकरणे काव्यमेतत् प्रणीतम्। एतस्य सम्पादकः टी. केशवभट्टः बंगलोरनिवासी वर्त्तते। तेनाधुनिककन्नडेऽस्य काव्यस्यानुवादोऽपि विहितः। दक्षिणीयभाषाणां काव्यानां प्रकाशनस्यैष प्रयासोज्ञानपीठस्य परमश्लाघनीयोऽस्ति।

माणिकचन्द्रदिगम्बरजैनग्रन्थमालायाः तत्त्वावधाने वाराणसेयभारतीयज्ञानपीठेन जैनशिलालेखस्य पञ्चमभागस्य शृंगारार्णवचन्द्रिकायाश्च प्रकाशनं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कृतम्। जैनशिलालेखस्य पञ्चमभागस्य सम्पादकः डा. विद्याधर-जोहरापुरकरोऽस्ति। डा. जोहरापुरकरोऽस्य ग्रन्थस्य प्रस्तावनायामभिलेखानां महत्त्वेन सह द्राविडसंघ-यापनीयसंघ-वाग्भटसंघ-माथुरसंघ-काष्ठासंघ-मूलसंघानां परिचयान्ते सूरस्थगण-सेनगण-देशिगण-कारूरगण-बलात्कारगणादीनामपि परिचयं दत्तवान्। यैः राजवंशैः जैनधर्म-जैनसाहित्ययो. समृद्धौ योगदानं कृतं तेषामपि यथास्थानं निर्देशः कृतो विद्यते। एवं प्रकारेणास्याभिलेखसग्रहस्य प्रस्तावनायामनेकमहत्त्वपूर्णविषयाणां परिज्ञानं भवति। संग्रहेऽस्मिन् पञ्चसप्तत्युत्तरत्रिशत्संख्याका अभिलेखाः सन्ति।

शृङ्गारार्णवचन्द्रिकायाः सम्पादकः डॉ० वामन महादेव कुलकर्णी वर्तते। प्रारम्भे पञ्चषष्टिसंख्यात्मिकायामाङ्गलभूमिकायां ग्रन्थ-ग्रंथकारविजयवर्णिसम्बन्धे विस्तृतः प्रकाशो दत्तोऽस्ति। ग्रन्थः दशाध्यायेषु विभक्तो विद्यते। वर्णगणफलनिर्णयकाव्यगतशब्दार्थनिश्चय-वृत्तिनिश्चय-रीयापाकनिश्चय-अलङ्कारनिर्णय-दोषगुणनिर्णयाः विभागाः सन्ति। परिशिष्टेऽकारादिपद्यक्रमसूच्यनन्तरं तुलनात्मिकाः ग्रन्थ-टिप्पणयः सन्ति। यासु भामह-वाग्भट्टामृतानन्दयोग्यादिभिः सह तुलना कृता विद्यते। एष लघुकायग्रथोऽलङ्कार-शास्त्रविकासक्रमावगत्यै परमोपयोगी वर्तते।

भारतीयज्ञानपीठेन "संस्कृतकाव्य के विकासमें जैनकवियों का योगदान"—शीर्षकः शोधप्रबन्धः प्रकाशितः। प्राचीनभारतीयवाङ्मयस्यानुसन्धानदिशि एष एका-मौलिकप्रयत्नोस्ति। ग्रंथः सप्ताध्यायेषु विभक्ता विद्यते। प्रथमाध्याये संस्कृतकाव्यानां विकासः, जैनकाव्यानां तेषु स्थानम्, संस्कृतश्रेष्ठकाव्यापेक्षया जैनकाव्यानां भिन्नताः तथा मौलिकतास्तथा विधाक्रमेण संस्कृत-जैनकाव्यानां विकासस्येतिवृत्तानि निबद्धानि। द्वितीयाध्याये दशमशतकपर्यन्तं चरितनामान्तमहाकाव्यानां विश्लेषणं विवेचितं विद्यते। तृतीयाध्याये एकादशशतकादारभ्य चतुर्दशशतकपर्यन्तं चरितनामान्तमहाकाव्यानां कथावस्तूनि, कथास्रोतांसि, रसयोजना, प्रकृतिचित्रणम्, तथान्यसंस्कृतकवीनां काव्यैः सह तुलनात्मकविवेचनानि प्रस्तुतानि सन्ति। चतुर्थाध्याये धर्मशर्माभ्युदय-नेमिनिर्वाण-जयन्तविजय-नरनारायणानन्द-पद्मानन्द-महाकाव्यानां तुलनात्मकविवेचनं कृतमस्ति। पञ्चमाध्याये सप्तसन्धान-हम्मीरमहाकाव्यानां तथा महत्त्वपूर्णाभिलेखानां काव्यात्मकमैतिहासिकञ्च मूल्यं निर्धारितमस्ति। षष्ठाध्याये चत्रचूडामणि-शत्रुञ्जयमहाकाव्य-सुदर्शनचरित-यशोधरचरित-जैनकुमारसम्भव-महीपालचरित-पार्श्वाभ्युदय-जैनमेघदूत-नेमिदूत-शीलदूत-पवनदूत-रतोत्रकाव्यानाञ्चानु-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शीलनं विद्यते। सप्तमाध्याये संस्कृत-जैनकाव्यानामान्तरिकानुशीलनेन सह प्रेमतत्त्व-सौन्दर्यतत्त्व-कामतत्त्व - राजनीतितत्त्व - धर्मदर्शनतत्त्व-शिक्षा-संस्कृति-तत्त्वानाञ्च विश्लेषणं वर्त्तते।

भारतीयज्ञानपीठात द्विसप्तनवैकेऽब्दे "अपभ्रंशभाषा-साहित्यकी शोधप्रवृत्तियाँ" शीर्षकग्रन्थः प्रकाशितो विद्यते। ग्रन्थोऽयं डॉ० देवेन्द्रकुमार शास्त्रिणा व्यलेखि। ग्रन्थेऽस्मिन् लेखकेनापभ्रंशप्राकृतयोः सम्बन्धं संस्थाप्य तदनन्तरं प्रकाशितापभ्रंशविषयकशोधनिबन्धप्रबन्धग्रन्थानां सूचनाऽङ्कितास्ते।

वर्णिग्रन्थमालायाः प्रकाशितसंस्कृत-प्राकृतग्रन्थानां विवरणम्

प्रायेण विगतपञ्चदशवर्षावधौ वर्णिग्रन्थमालया पञ्चाध्यायी - तत्त्वार्थ-सूत्रविवेचना—समयसार—आदिपुराण में प्रतिपादित भारत'-सदृशमहत्त्वपूर्ण-ग्रन्थानां संशोधन-सम्पादन-प्रकाशनानि विहितानि। प्राकृतजैनसाहित्यदृष्ट्या ग्रन्थमालाया अस्या महत्त्वमनुपेक्षणीयं वर्त्तते। डॉ० दरबारीलालकोठिया-महोदयस्य प्रयासेनेयं संस्था प्रकाशनकार्ये विशेषरूपेण तत्परा दिनानुदिनं श्वयन्त्यस्ति।

श्रीअमृतचन्द्रसूरिकृत "तत्वार्थसारः" वाराणसेयश्रीगणेशप्रसादवर्णिग्रंथ-मालायाः प्रकाशनमस्ति। ग्रंथस्यास्य सम्पादको बहुश्रुतो विद्वान् पण्डितश्री पन्नालाल-साहित्याचार्योऽस्ति। अस्य सम्पादनेन सह मातृभाषानुवादोऽपि विहितोऽस्ति। प्रारम्भे अष्टात्रिंशत्पृष्ठात्मिका महत्त्वपूर्णा प्रस्तावना विद्यते, यस्यां ग्रन्थस्य ग्रन्थकारस्य चाध्ययनं वर्तते। ग्रन्थोऽष्टाधिकारेषु विभक्तोऽस्ति। प्रथमाधिकारे सम्यग्दर्शनादीनां स्वरूपेण सह तद्विषयभूतजीवादिसप्ततत्त्वानां विशदं वर्णनं वर्त्तते। द्वितीयाधिकारे जीवस्यौपशमिक-क्षायोपशमिकौदयिक-पारिणामिकपञ्चभावानां तृतीयेऽजीवतत्त्वस्य चतुर्थे आस्रवतत्त्वस्य पञ्चमे बाधतत्त्वस्य षष्ठे संवरतत्त्वस्य सप्तमे निर्जरातत्त्वस्याष्टमे च मोक्षतत्त्वस्य वर्णनानि सन्ति।

कुन्दाकुन्दाचार्यस्य समयसारोपरि आध्यात्मिकसन्तश्रीगणेशप्रसादवर्णि-लिखितप्रवचनभाष्यस्य प्रकाशनमपि वर्णिग्रंथमालया कृतमस्ति। यद्यपि समय-सारोपरि सम्प्रत्यनेकभाष्यटीकाः प्रकाशिताः सन्ति, परं निश्चयनय-व्यवहार-नययोः समन्वयकारणात् ग्रंथस्यास्य विशेषमूल्यमस्ति। सत्प्ररूपणासूत्रस्य मातृभाषानुवादः शंकासमाधानञ्च सिद्धान्ताचार्येण पण्डितकैलाशचन्द्र शास्त्रिणा, प्रधानाचार्येण, वाराणसेयस्याद्वादमहाविद्यालस्य, विहिते स्तः। एषोऽनुवादः शङ्कासमाधानञ्च वीरसेनाचार्यस्य धवलाटीकामाधृत्य कृते

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

विद्येते। वाराणसेयवर्णिग्रन्थमालया एतद्ग्रंथं प्रकाश्याप्राप्यबलाप्रथमपुस्तकस्यांशिकी पूर्त्तिर्विहिता। पण्डितकैलाशशास्त्री सिद्धान्तविषयस्य विशेषज्ञतामर्हति। अतो ग्रन्थस्सर्वदृष्ट्योपयोगी वर्त्तते।

प्राकृतजैनाध्ययनदिशि वीरसेवामन्दिरट्रस्टस्य साहित्य-प्रणयनम्

विगतद्वित्रिवर्षेभ्यः वीरसेवामन्दिरट्रस्टोऽपि ग्रन्थप्रकाशनकार्यं कुर्वन्नस्ति। अनया संस्थया सर्वप्रथमं न्यायाचार्यस्य डा० दरबारीलालकोठियामहोदयस्य—"जैन तर्कशास्त्र में अनुमान विचार" शीर्षकशोध-प्रबन्धस्य प्रकाशनमकारि। डॉ० कोठिया-महोदयो जैनशास्त्रस्य प्रतिभासम्पन्नो मनांषी विद्वानस्ति। एषा रचना पञ्चाध्यायेषु द्वादशपरिच्छेदेषु च विभक्ता विद्यते। लेखकेन सहानुभूतिपूर्वकं वात्स्यायनोद्योतकर-धर्मकीर्ति-धर्मोत्तरार्चटादितार्किकानां मान्यतायाः समीक्षां कुर्वता जैनन्यायस्य प्रतिपादनं कृतम्। एतस्याः संस्थायाः द्वितीयोग्रन्थः लोकविजययन्त्रनामकः प्रकाशितो विद्यते। एष प्राकृतभाषायां लिखितोऽस्ति। अयं ग्रंथः ज्यौतिषविषयको विद्यते। व्यक्त्यपेक्षयास्मिन् राष्ट्र-देश-नगर-ग्रामाणां फलादेशः निष्कासितोऽस्ति। विषयदृष्ट्या ग्रंथोऽपूर्वो विद्यते। भारतीयज्यौतिषे एतत्समकक्षाऽन्या रचना नास्ति। ग्रन्थे त्रिंशद्गाथाः सन्ति। भाषादृष्ट्या ग्रन्थः परमः प्राचीनोऽस्ति।

'वीरसेवामन्दिरट्रस्टतः' पण्डितकैलाशचन्द्रसिद्धान्ताचार्यस्य प्रमाणनयनिक्षेपनामको ग्रन्थः प्रकाशितो विद्यते। ग्रन्थेऽस्मिन् जैनसिद्धान्तस्य महत्त्वपूर्णविषयस्य प्रमाणनयनिक्षेपस्य च विशदं विवेचनं विहितमस्ति। अध्ययनेनास्य ग्रन्थस्य जैनसिद्धान्तस्योक्तानां त्रयाणामपि महत्त्वपूर्णविषयाणां ज्ञानं जायते।

अस्या एव संस्थायाः समन्तभद्रविरचितस्य रत्नकरण्डश्रावकाचारस्योपरि प्रभाचन्द्रविहितायाः संस्कृतटीकायाः पन्नालाल-साहित्याचार्य-सम्पादितं समूलहिन्दीरूपान्तरं प्रकाशितं वर्त्तते। प्रभाचन्द्रस्य संस्कृतटीकायाः आचार्यश्री जुगलकिशोर-मुख्तारसम्पादितं प्रकाशनं सुरुचिपूर्णं माणिकचन्द्रग्रन्थमालातोऽभवत्। टीकेयमद्यावध्यनुपलब्धासीत्। इदानीमेतस्याः प्रकाशनेन हिन्दीरूपान्तरेण च शोधार्थिनां शोधकार्येषु सौकर्यमायास्यति। आचार्यप्रभाचन्द्रेण टीकायामस्यां यासां कथानां समावेशो विहितः, तासां कथानां सांस्कृतिकतत्त्वदृष्ट्या विशेषमहत्त्वमस्ति। कथाः पौराणिक्यः सत्योऽपि दशमैकादशशत्योः भारतीयसंस्कृतेः पूर्णतयाऽभिव्यञ्जिकाः सन्ति। एवं रीत्या वीरसेवामन्दिरट्रस्टेन प्राकृतजैनदर्शनसम्बन्धिसाहित्यस्य प्रकाशनं विधाय जैनाध्ययनाय गतिशीलता प्रदत्ता।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीलालभाई-दलपतभाई भारतीयसंस्कृतिविद्यामन्दिरस्यावदानम्

विगतकतिपयवर्षेभ्य एतत्संस्थया जैनसाहित्यस्यानेकमहत्त्वपूर्णग्रन्थाः प्रकाशिताः। एतस्य निदेशकस्य पं० दलसुखमालवणियामहोदयस्य तत्त्वावधाने ऽद्ययावत् पञ्चत्रिंशत् ग्रन्थाः प्रकाशिताः। इमे सर्वे ग्रन्थाः शोधार्थिभ्यो महत्त्वपूर्णा उपयोगिनश्च सन्ति। एतया संस्थया जैनागमेषु टीकाग्रन्थोपरि च विशेषरूपेण शोधकार्याणि सम्पद्यन्ते। अनेकप्राचीनग्रन्थानामालोचनात्मकसंस्करणानि प्रस्तुतानि विद्यन्ते।

शून्यर्षिनवैके तथैकर्षिरसैके खीष्टाब्दे श्रीलालभाईदलपतभाईभारतीय-संस्कृतिविद्यामन्दिरतः श्री एम्० सी० मोदी तथा डॉ० एच० सी० भयाणी महोदयौ स्वसम्पादकत्वे हरिभद्रस्य 'नेमिनाहचरिउ' ग्रन्थस्य प्रकाशनं कृतवन्तौ। एवमेव डॉ० श्रीमत्याः रत्नाश्रेयान्-महोदयायाः शोधप्रबन्धः—"ए क्रिटिकल स्टडी ऑफ महापुराण ऑफ पुष्पदन्त" शीर्षकस्तत एव प्रकाशितो विद्यते। अस्मिन् प्रबन्धे पुष्पदन्तस्य देश्यानान्तथान्यापूर्वशब्दानां व्युत्पत्तिमूलकमध्ययनं प्रस्तुतमस्ति। देशिशब्दानां परिज्ञानदृष्ट्या एष शोधप्रबन्धो विशेषोपयोगी वर्तते। डॉ के० के० दीक्षितलिखिताङ्गलानुवादसहितस्य हरिभद्रस्य योगदृष्टिसमुच्चयस्य प्रकाशिकापि संस्थैषा वर्त्तते। डॉ० मोहनलालमेहता डॉ० के० आर० चन्द्रा-सम्पादितः प्राकृत-व्यक्तिवाचकसंज्ञाकोषः (Dictonary of Prakrit Proper names) प्रथमभागात्मकः तथा जैनकथासाहित्यनामको ग्रंथः डॉ० जगदीशचन्द्रजैनलिखितो विद्यते। डॉ० के० के० दीक्षितेन जैनतत्त्वमीमांसायाः रचना विहिता। एतेषां महत्त्वपूर्णग्रंथानां प्रकाशनमपि ततएव जातमस्ति।

प्राकृतग्रन्थपरिषदः प्रकाशनम्

प्राकृतग्रन्थपरिषदः षोडशमहत्त्वपूर्णग्रन्थाः प्रकाशिताः। शून्यसप्तनवैक-खीष्टाब्दात् द्विसप्तनवैकखीष्टाब्दं यावत् प्रकाशितग्रन्थेषु डॉ० हीरालालजैनमहो-दयानां सम्पादकत्वे श्रीचन्द्रस्य "पभ्रंशकथाकोसु" ग्रन्थस्य प्रकाशनं महत्त्वमा-वहति। डॉ० महोदयैः महत्त्वपूर्णप्रस्तावनया सहालोचनात्मकपाठाः स्वावस्तृत-टिप्पणयश्चाङ्किताः। ग्रन्थस्यास्य प्रकाशनेन भारतीयाख्यानसाहित्यस्य महत्त्वं लक्ष्यते। अन्यग्रन्थः 'वज्जालग्गं' नामकः प्रकाशितो विद्यते। एतस्य सम्पादनं डॉ० पट्टवर्द्धनेनाकारि। डॉ० पट्टवर्द्धनः स्वविस्तृताङ्गलप्रस्तावनायां मुक्तक-काव्यपरम्परामुद्घाटितवान्। 'वज्जालग्ग'स्य विभिन्नशब्दानां व्युत्पत्तिस्तदर्था-श्चोट्टङ्किताः। समस्तग्रन्थानामाङ्गलानुवादोऽपि विहितः। अनयैव संस्थया-चार्यप्रद्युम्नसूरेः 'मूलशुद्धिप्रकरण' ग्रन्थस्य प्रकाशनं देवचन्द्रकृतटीकासहितं विहितम्। सम्पादनकार्यं पण्डितामृतलालभोजकेन व्यधायि।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दिल्ली-वीरसेवामन्दिरस्य प्रकाशनम्

अस्याः संस्थाया अद्य यावत् कतिपयग्रन्थानां प्रकाशनभूत्। द्विसप्तनवैके खीष्टाब्दे 'जैनलक्षणावली' नामकस्य जैनपारिभाषिकशब्दस्य प्रकाशनं जातमस्ति। अयं ग्रन्थः पण्डितबालचन्द्रेण सिद्धान्तशास्त्रिणा सम्पादितो वर्त्तते। जैनलक्षणावल्याः कार्यं द्वित्रिनवैके खीष्टाब्दे आचार्यश्रीजुगलकिशोर - मुख्तारस्य तत्त्वावधाने प्रारब्धमासीत्। आंशिकपूर्त्तिर्यस्य श्रीबालचन्द्रसिद्धान्तशास्त्रिणा कृता। एतल्लक्षणावल्याः प्रथमखण्डमस्ति। अस्मिन्नोंकारपर्यन्तपारिभाषिकशब्दानां भावार्थपूर्वकलक्षणानि चतुश्शतदिगम्बरस्थेताम्बरसम्प्रदायीयग्रन्थानां प्रमाणैः सहितानि समुपस्थापितानि। ग्रन्थ एषोऽनुसन्धानकृते तु उपयोगी वर्त्तत एव, तत्त्वजिज्ञासुभ्योऽपि नास्योपयोगिताऽल्पा विद्यते। प्रस्तावनायां ग्रन्थपरिचयः परिशिष्टे च ग्रन्थकाराणामनुक्रमणिका च अंकिते स्तः। यतो ग्रन्थस्यास्योपयोगिताऽधिका वृद्धिमती लक्ष्यते।

सोलापुरीयजीवराजग्रन्थमालायाः प्रकाशितसाहित्यम्

सोलापुरीया श्री जीवराजग्रन्थमाला तिसृणामपि-हिन्दी-मराठी-कन्नडभाषाणामार्षग्रन्थान् प्रकाशयन्ती विद्यते। ग्रन्थमालाया अस्या अद्य यावत् प्रायो द्वाविंशतिहिन्दीग्रन्थानां त्रयाणां कन्नडग्रन्थानां तथैकत्रिंशत्मराठीभाषाग्रन्थानां प्रकाशनमभवत्। रामाब्धिरसैके खीष्ट्राब्दे, मुनिचन्द्रविरचित 'विद्वन्मनोवल्लहभाख्या'-ख्यानेन', गुणनन्दिकृतपंजिकया, हिन्दीरूपान्तरेण च सहितस्य 'चन्द्रप्रभचरितस्य' प्रकाशनं पण्डितअमृतलालशास्त्रिजैनदर्शनसाहित्याचार्यस्य सम्पादकत्वेऽजनि। ग्रन्थस्यास्योभेऽपि संस्कृतटीकेऽद्ययावदप्रकाशिते एवास्ताम्। अनेनालोचनात्मकप्रकाशनेन काव्यशास्त्राध्येतृभिः महत्त्वपूर्णग्रन्थ उपलब्धः। श्रीअमृतलालजी - महोदयेन मूलानुसारमनूद्य ग्रन्थ एषः सरलः सरसश्च व्यधायि। प्रस्तावनायां रचयितुः रचनायाश्च परिचयस्तु दत्त एव, काव्यात्मकविशेषता अपि प्रतिपादिताः सन्ति।

द्विसप्तनवैके खीष्टाब्देऽस्या एव ग्रन्थमालायाः डॉ० श्री राजारामजैनसम्पादितायाः रइधू-ग्रन्थावल्याः प्रकाशनं जातमस्ति। अस्यां महाकवेः रइधोः 'पासणाहचरिउ'-'सुकोसलचरिउ'-ग्रन्थयोः संग्रहो विद्यते। डॉ० श्री राजारामजैनेन कतिपयपाण्डुलिपीराधृत्य तत्कृत्योः संशोधन-सम्पादने तु कृत एव, परं हिन्द्यनुवादं विधाय तदध्ययनीवताऽपादिता। ग्रन्थमालेयं समस्तरइधु साहित्यस्य, कतिपयभागेषु, प्रकाशनं विधास्यति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

कतिपयान्यसंस्थानां प्राकृताध्ययनदिशि प्रकाशनकार्याणि

बह्व्य एतादृश्योऽपि प्रकाशनसंस्थाः सन्ति, यासां प्राकृताध्ययनदिशि विकीर्णप्रकाशनान्यपि समधिकमूल्यमावहन्ति। एतेषु प्रकाशनेषु सर्वप्रथमं पार्श्वनाथ - विद्याश्रमः वाराणसेयः, दिगम्बरजैनसंघः मथुरास्थः विशेषमहत्त्वपूर्णौ गण्येते।

पार्श्वनाथविद्याश्रमतः जैनसाहित्यस्य बृहदितिहासस्य पञ्चमखण्डं लाक्षणिकसाहित्यं प्रकाशितमस्ति। खण्डेऽस्मिन् व्याकरणकोशालङ्कारच्छन्दोनाट्यसंगीतकलागणित - ज्यौतिषशकुननिमित्तस्वप्नसामुद्रिकरमललक्षणायार्घकोष्ठकायुर्वेदनीतिशास्त्र - शिल्पशास्त्र - रत्नशास्त्र-मुद्राशास्त्र - धातुविज्ञान-प्राणिविज्ञानादिविषयकग्रन्थानां संक्षिप्तपरिचयः प्रस्तुतो विद्यते। शोध-प्रबन्धानां प्रकाशनमपि संस्थाया अस्याः जातमस्ति। इमे सर्वे ग्रन्थाः प्राकृतजैन-विषयकसाहित्यस्य ज्ञानदृष्ट्या महत्त्वपूर्णाः सन्ति। दिगम्बरजैनसंघात् मथुरास्थितात् कसायपाहुडस्य द्वादशभागः प्रकाशितोऽस्ति। एतस्य सम्पादनं पण्डितफूलचन्द्रसिद्धान्तशास्त्रिणा पण्डितकैलाशचन्द्रजी-शास्त्रिणा च कृतम्। इमौ द्वावपि विद्वांसौ कर्मप्राभृतशास्त्रस्य विशेषज्ञौ स्तः। ग्रन्थारम्भे त्रिचत्वारिंशत्पृष्ठानां प्रस्तावनास्ति, यस्यां ग्रन्थस्य विषयस्य पूर्णतया स्पष्टीकरणमस्ति। अन्यरचनासु 'भरत और भारत' नामकग्रन्थस्य प्रकाशनं वडौत-दिगम्बर-कालेजतो जातमस्ति। अस्य लघुकायग्रन्थस्य लेखकः डॉ॰ प्रेमसागरजैनोऽस्ति तथास्मिन् ब्रह्माण्डपुराणाग्निपुराणमार्कण्डेयपुराण-नारदपुराण-श्रीमद्भागवतपुराणादिषु प्रतिपादितभरतविषयकोद्धरणानां संकलनं कृत्वा भरतस्य व्यक्तित्वस्य स्वरूपाङ्कनं कृतमस्ति। एतस्मिन् कथितमस्ति यदेतस्य 'भारतनाम' भरतचक्रवर्त्तिनो नामोपरि जातम्। शोधप्रबन्धेषु दलसुखमालवणिया-महोदयस्य प्रज्ञापना तथा षट्खण्डागमशीर्षकशोधप्रबन्धः 'जनरल आफ दी महाराजा सयाजीराव युनिवर्सिटी आफ बड़ौदा', भाग १६ संख्या १०२ मध्ये प्रकाशितौ स्तः। निबन्धेऽस्मिन् चिन्तकोमनीषी पण्डितमालवणियामहोदयः प्रज्ञापनायाः षट्खण्डागमस्य च कतिपयकथनेषु समानतां तथा प्रज्ञापनां तृतीयशतकात् चतुर्थशतकाच्च पूर्ववर्तिनीं कथयन् षट्खण्डागमं तद्गणिनं स्वीकृतवान्। एतस्योत्तरं श्रीकैलाशचन्द्रशास्त्रिमहोदयः सत्प्ररूपणासूत्रस्य भूमिकायां लिखितवान्। गोहाटी विश्वविद्यालयस्य पत्रे डा० श्रीनथमलजीटाटियामहोदयस्य 'दार्शनिक विचारों का वाहन' शीर्षकः प्राकृतनिबन्धः प्रकाशितो वर्तते। निबन्धोमहत्त्वपूर्णोऽस्ति तथानेकनवीनसूचनाभिर्युक्तो विद्यते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राकृतसंगोष्ठ्यः

विगतद्वयोः वर्षयोः प्राकृतविषयस्य गम्भीराध्ययनस्य प्रोत्साहनकृत एकस्या संगोष्ठ्याः आयोजनं विश्वविद्यालयानुदानायोगस्य सहयोगेन बोधगया-मगध विश्वविद्यालयस्य परिवारे द्वाविंशत्तममार्चादारभ्य पञ्चविंशत्तममार्च-पर्यन्तम्, एकर्षिरसैकखीष्टाब्दे तथान्यस्या आयोजनञ्च वंबईविश्वविद्यालयस्य तत्त्वावधाने विश्वविद्यालयस्यानुदानस्य सहयोगेनैवाक्टूबर सन् १९७१ वर्षे जाते। अनयोरुभयोरपि संगोष्ठ्योः प्राकृतसाहित्यस्य मूर्धन्यविद्वद्भिः सम्मिलितैः स्वशोधपूर्णनिबन्धानां पाठोऽकारि। मगधविश्वविद्यालये समायोजिताया: अस्याः गोष्ठ्याः कार्यविवरणं मुद्रितमस्ति। अस्याः गोष्ठ्याः सञ्चालने दर्शन-विभागाध्यक्षस्य डॉ० या० मसीह महोदयस्य तथा हिन्दीविभागाध्यक्षस्य डॉ० कुँवरचन्द्रप्रकाशसिंह-महोदयस्य महत्त्वपूर्णं योगदानमस्ति। तत्कालीनोप-कुलपतिमान्यवरश्रीगोपालप्रसादमहोदयस्य च तद्गोष्ठ्याः प्रवर्त्तने श्लाघनीया भूमिकापि नोपेक्षणीया।

नवानां पत्राणां प्रकाशनम्

अतीतवर्षेषु प्रकाशितपत्रपत्रिकाभिः सह द्वयोः नवीनपत्रयोः प्रकाशनं प्रारब्धमस्ति। इमे द्वेऽपि पत्रे इन्दौरतः प्रकाशिते वर्त्तेते। अनयोरेकं 'तीर्थंकर' नामकं पत्रमस्ति। यज्जैनविषयान् सार्वजनीनरूपेण प्राञ्जलपरिमार्जितशैल्यां प्रस्तौति। अस्य सम्पादकः डॉ० नेमिचन्द्रजैनोऽस्ति। पत्रमुपयोगि सदपि स्वोद्देश्यात्किञ्चिद्दूरे स्थितमस्ति। तीर्थंकरवाण्याः येन रूपेण यादृशं प्रस्तुती-करणमपेक्ष्यते, तादृशं न जायते। अस्मादेव नगरात् प्रकाश्यमानं द्वितीयं पत्रं 'सम्मति-वाणी' अस्ति। एतस्य पत्रस्यावलोकनेनैवमवगम्यते यत् तीर्थंकर'-स्यानुकरणोपरि अनेनापि स्वकायापरिवर्तनमकारि। नामानुसारमेतत् 'सन्मति-वाणी'—पत्रमपि स्वरूपस्य यथार्थप्रकाशनेऽसमर्थं प्रतीयते। अस्य पत्रस्य प्रधान-सम्पादकः पण्डितनाथूलालजी शास्त्रिमहोदयोऽस्ति। इमे द्वेऽपि पत्रे मामा-शान्वितं कुरुतः।

जैनसाहित्यस्य प्रचारकं मुनिद्वयम्:

एवं तु प्राकृतजैनवाङ्मयस्याध्ययने सर्वे त्यागिनः मुनयः स्वसहयोगं प्रददति। परमाचार्यतुलसीगणिस्तथाध्यात्मसन्तः काञ्जी स्वामी स्वदृष्ट्या-गमसाहित्यस्य प्रकाशने प्रगतिशीलौ स्तः। परमुपाध्यायमुनि-श्रीअमरचन्द्रः आगरास्थस्तथा विद्यानन्दमहाराजः प्राकृतजैनसाहित्यं सार्वजनिकरूपेण प्रस्तुतं कुरुतः। मुनिश्रीअमरचन्द्रजी उपाध्यायः सार्वजनिकप्रवचनैः सह ग्रन्थान्

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

रचितवान्। विद्यानन्दजी - महाराजस्य "विश्वधर्म के दस लक्षण" तथा "विश्वधर्म के मंगल पाठ" और "पिच्छी कमण्डलु" रचनाः सार्वजनिक-दृष्ट्या उपयोगिन्यः सन्ति।

नवसम्भावनाः

प्राकृत-जैनशास्त्रयोरध्ययनदिश्यनेकसम्भावनाः सन्ति। इदानीं यावत्साहित्यं प्रकाशमागतमस्ति ततस्सहस्रगुणितं ग्रन्थभाण्डारेऽप्रकाशितं विद्यते। जैनशास्त्राणां मुख्याधारस्सप्तभङ्गीपद्धतिरस्ति या विभिन्नदृष्टिकोणैः सत्यमुपस्थापयति विचारवैविध्यमेकधरातले समुपस्थाप्य समन्वयात्मकजीवनविश्लेषणमेवास्याः पद्धत्याः विशेषता वर्तते। साहित्यकाराणामुदारविचाराः अनेकान्तसिद्धान्तालोके एव विकसिताः सन्ति। प्रारम्भादेव जैनवाङ्मये जनक्रान्तिर्लक्ष्यते तथापि श्रेण्यप्रवृत्तयः पूर्णरूपेण वर्त्तमानाः सन्ति। सत्यपि दर्शनविशेषे जैनदर्शनं साम्प्रदायिकं न भवितुं शक्नोति। यतस्साहित्येऽनिवार्यतः कस्या अपि दृष्टेः दर्शनस्याथवा प्रतिफलं तिष्ठति। यदि दर्शनविशेषकारणात् जैनवाङ्मयं साम्प्रदायिकं मन्येत, तदा वर्तमानसमाजवादिसाहित्यमथवा कस्मिन्नप्यन्यस्मिन् कालखण्डे निर्मितसाहित्यमपि साम्प्रदायिकं स्यात्। संस्कृते लिखिता दर्शन-न्यायशास्त्रविषयकाः जैनग्रन्थाः भारतीयचिन्तनस्याध्ययनकृते तथैवोपयोगिनोऽसम्प्रदायिकाश्च सन्ति, यथा न्यायसांख्यवैशेषिकयोगमीमांसावेदान्तादिदर्शनैः सम्बद्धाः ग्रन्थाः सन्ति अथवा भारतीयदर्शनाधृताः लिखिताः आधुनिकग्रन्थाः सन्ति। एतदतिरिक्ताः मन्त्र-तन्त्र-पूजा-पाठ-प्रतिष्ठा-व्रतानुष्ठान-मुनिचर्या-गृहस्थचर्या - लोकालोकवर्णन-काव्य-व्याकरण-नाटकालङ्कार-ज्यौतिषादिविषयैः सम्बद्धाः अनेके ग्रन्थाः प्राप्ताः सन्ति। एतेषां ग्रन्थानां संशोधनं प्रकाशनञ्च शीघ्रमपेक्ष्यते। यतः भारतीयसंस्कृतेः वास्तविकं ज्ञानं जैनवाङ्मयस्याध्ययनं विनाऽपूर्णमस्ति।

जैनवाङ्मयं विश्वशान्तेस्तथा विश्वमैत्र्याः आधारभूतसिद्धान्तानां प्रतिनिधित्वं करोति। भ्रष्टाचारनैतिकतयोरवरोधाय साहित्येऽस्मिन् व्यक्तविचाराः कर्त्तव्यानि च नितान्तमुपयोगीनि सन्ति। भूतदया-गुणवाद-प्रेम शान्ति-समत्व-प्रचारेण देशे नैतिकतायाः प्रतिष्ठा भवतुं शक्नोति। अतएव शोधग्रंथैस्सह सार्वजनिकोपयोगिग्रन्थानां निर्माणमप्यावश्यकमस्ति।

प्राकृतिकभाषा-वाङ्मयस्य मूलभाषा विद्यते। एतस्याः भाषायाः उत्तरकालीनं विकसितरूपमपभ्रंशोऽस्ति। जैनाचार्यैरनयोः द्वयोः भाषयोः विपुलसाहित्यं प्रणीतम्। सम्प्रति प्राकृतापभ्रंशाध्ययने ध्यानं नाधीयते। भाषादृष्ट्या

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्राकृतापभ्रंशयोरध्ययनाभावे संस्कृताध्ययनमप्यपूर्णमस्ति। अतएव भारतीय-विश्वविद्यालयेषु संस्कृतपाल्यध्ययनसदृशं प्राकृताध्ययनमप्यावश्यकं विद्यते। मान्यसदस्यैरस्यां दिशि विशेषप्रयत्नशीलैः भाव्यम्, यतः प्रत्येकविश्वविद्यालये प्राकृतभाषायाः अध्ययनाध्यापनयोः व्यवस्था भवेत्।

अस्माकं सविधौ प्राचीन-प्राकृत-जैन-शास्त्रविषयकरचनानां-सम्पादनानुवाद-प्रकाशनानि जायमानानि सन्ति। परं नवसाहित्य-निर्माणदिशि विदुषां ध्यानं न विद्यते। अत एव काव्य-नाटकोपन्यास-कथा--काव्यादीनां प्राकृत-संस्कृत-हिन्दी-मराठी-गुजराती-तमिल-कन्नडादि-भाषासु निर्माणं परमावश्यकमस्ति। शोधकार्य-सदृशमेव नववाङ्मयरचनासु विदुषां ध्यानाकर्षणं परमावश्यकं वर्त्तते।

जैनदर्शनालोके चार्वाकदर्शनस्य मूलसिद्धान्तानां संकलनं कर्त्तुं शक्यते। अतएव प्राचीनदर्शनानां मूलसन्दर्भाणां संकलनमपेक्षितमस्ति, प्राकृतजैनवाङ्मये सोधार्थं महत्यः सम्भावनाः सन्ति।

अहमन्ते भवतां सर्वेषामाभारं स्वीकरोमि, यैरेषोऽवसरः प्रदत्तः। मया भवतां समक्षं प्राकृतजैनवाङ्मयाध्ययनप्रगत्याः संक्षिप्तमितिवृत्तं समुपस्थापितम्। त्रुटीनां संभावनास्ति, तदर्थं पुनः पुनः क्षमा प्रार्थ्यते।

❀

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मुद्रक : पं० विमलाशरण उपाध्याय, संसार प्रेस, गोपाली चौक, आरा।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi